# श्रीमद्भागवत रसिक कुटुंब

## श्रीपुरुषोत्तमसहस्रनामस्तोत्रम्

### विनियोगः

पुराणपुरुषो विष्णुः(फ्) पुरुषोत्तम उच्यते ।

नाम्नां(म्) सहस्रं(वँ) वक्ष्यामि तस्य भागवतोद्धृतम् ॥ 1॥

(एतन्माहात्म्यम्)

यस्य प्रसादाद्वागीशाः(फ्), प्रजेशा विभवोन्नताः ।

क्षुद्रा अपि भवन्त्याशु, श्रीकृष्णं(न्) तं(न्) नतोऽस्म्यहम् ॥ 2॥

अनन्ता एव कृष्णस्य, लीला नामप्रवर्तिकाः ।

उक्ता भागवते गूढाः(फ्), प्रकटा अपि कुत्रचित् ॥ 3॥

अतस्तानि प्रवक्ष्यामि, नामानि मुरवैरिणः ।

सहस्रं(यँ) यैस्तु पठितैः(फ्), पठितं(म्) स्याच्छुकामृतम् ॥ 4॥

कृष्णनामसहस्रस्य, ऋषिरग्निर्निरूपितः ।

गायत्री च तथा छन्दो, देवता पुरुषोत्तमः ॥ 5॥

विनियोगः(स्) समस्तेषु, पुरुषार्थेषु वै मतः ।

बीजं(म्) भक्तप्रियः(श्) शक्तिः(स्), सत्यवागुच्यते हरिः ॥ 6॥

भक्तोद्धरणयत्नस्तु, मन्त्रोऽत्र परमो मतः ।

अवतारितभक्तां(म्)शः(ख्), कीलकं(म्) परिकीर्तितम् ॥ 7॥

अस्त्रं(म्) सर्वसमर्थश्च ,गोविन्दः(ख्) कवचं(म्) मतम् ।
पुरुषो ध्यानमत्रोक्तं, सिद्धिः(श्) शरणसं(म्)स्मृतिः ॥ 8॥

## प्रथमस्कंधीयनामानि

### (अधिकारलीला)

श्रीकृष्णः(स्) सच्चिदानन्दो, नित्यलीलाविनोदकृत् ।
सर्वागमविनोदी च, लक्ष्मीशः(श्) पुरुषोत्तमः ॥ 9॥

आदिकालः(स्) सर्वकालः(ख्), कालात्मा माययावृतः ।
भक्तोद्धारप्रयत्नात्मा, जगत्कर्ता जगन्मयः ॥ 10॥

नामलीलापरो विष्णुर्- व्यासात्मा शुकमोक्षदः ।
व्यापिवैकुण्ठदाता च, श्रीमद्भागवतागमः ॥ 11॥

शुकवागमृताब्धीन्दुः(श्), शौनकाद्यखिलेष्टदः ।
भक्तिप्रवर्तकस्त्राता, व्यासचिन्ताविनाशकः ॥ 12॥

सर्वसिद्धान्तवागात्मा, नारदाद्यखिलेष्टदः ।
अन्तरात्मा ध्यानगम्यो, भक्तिरत्नप्रदायकः ॥ 13॥

मुक्तोपसृप्यः(फ्) पूर्णात्मा, मुक्तानां(म्) रतिवर्धनः ।
भक्तकार्यैकनिरतो, द्रौण्यस्त्रविनिवारकः ॥ 14॥

भक्तस्मयप्रणेता च, भक्तवाक्परिपालकः ।
ब्रह्मण्यदेवो धर्मात्मा, भक्तानां(ञ्) च परीक्षकः ॥ 15॥

आसन्नहितकर्ता च, मायाहितकरः(फ्) प्रभुः ।
उत्तराप्राणदाता च, ब्रह्मास्त्रविनिवारकः ॥ 16॥

सर्वतः(फ्) पाणवपतिः(फ्), परीक्षिच्छुद्धिकारणम् ।
गूढात्मा सर्ववेदेषु, भक्तैकहृदयङ्गमः ॥ 17॥

कुन्तीस्तुत्यः(फ्) प्रसन्नात्मा, परमाद्भुतकार्यकृत् ।
भीष्ममुक्तिप्रदः(स्) स्वामी, भक्तमोहनिवारकः ॥ 18॥

सर्वावस्थासु सं(म्)सेव्यः(स्), समः(स्) सुखहितप्रदः ।
कृतकृत्यः(स्) सर्वसाक्षी, भक्तश्रीरतिवर्धनः ॥ 19॥

सर्वसौभाग्यनिलयः(फ्), परमाश्चर्यरूपधृक् ।
अनन्यपुरुषस्वामी, द्वारकाभाग्यभाजनम् ॥ 20॥

बीजसं(म्)स्कारकर्ता च, परीक्षिज्ज्ञानपोषकः ।
सर्वत्रपूर्णगुणकः(स्), सर्वभूषणभूषितः ॥ 21॥

सर्वलक्षणदाता च, धृतराष्ट्रविमुक्तिदः ।
सन्मार्गरक्षको नित्यं(वँ), विदुरप्रीतिपूरकः ॥ 22॥

लीलाव्यामोहकर्ता च, कालधर्मप्रवर्तकः ।
पाण्डवानां मोक्षदाता, परीक्षिद्भाग्यवर्धनः ॥ 23॥

कलिनिग्रहकर्ता च, धर्मादीनां(ञ्) च पोषकः ।
सत्सङ्गज्ञानहेतुश्च, श्रीभागवतकारणम् ॥ 24॥

## द्वितीयस्कंधीयनामानि

### (ज्ञान-साधन-लीला)

प्राकृतादृष्टमार्गश्च, श्रोतव्यः(स्) सकलागमैः ।
कीर्तितव्यः(श्) शुद्धभावैः(स्), स्मर्तव्यश्चात्मवित्तमैः ॥ 25॥

अनेकमार्गकर्ता च, नानाविधगतिप्रदः ।
पुरुषः(स्) सकलाधारः(स्), सत्त्वैकनिलयात्मभूः ॥ 26॥

सर्वध्येयो योगगम्यो, भक्तिग्राह्यः(स्) सुरप्रियः ।
जन्मादिसार्थककृतिर्- लीलाकर्ता पतिः(स्) सताम् ॥ 27॥

आदिकर्ता तत्त्वकर्ता, सर्वकर्ता विशारदः ।
नानावतारकर्ता च, ब्रह्माविर्भावकारणम् ॥ 28॥

दशलीलाविनोदी च, नानासृष्टिप्रवर्तकः ।
अनेककल्पकर्ता च, सर्वदोषविवर्जितः ॥ 29॥

## तृतीयस्कंधीय नामानि

### (सर्गलीला)

वैराग्यहेतुस्तीर्थात्मा, सर्वतीर्थफलप्रदः ।
तीर्थशुद्धैकनिलयः(स्), स्वमार्गपरिपोषकः ॥ 30॥

तीर्थकीर्तिर्भक्तगम्यो, भक्तानुशयकार्यकृत् ।
भक्ततुल्यः(स्) सर्वतुल्यः(स्), स्वेच्छासर्वप्रवर्तकः ॥ 31॥

गुणातीतोऽनवद्यात्मा, सर्गलीलाप्रवर्तकः ।
साक्षात्सर्वजगत्कर्ता, महदादिप्रवर्तकः ॥ 32॥

मायाप्रवर्तकः(स्) साक्षी, मायारतिविवर्धनः ।
आकाशात्मा चतुर्मूर्तिश्- चतुर्धाभूतभावनः ॥ 33॥

रजः(फ्)प्रवर्तको ब्रह्मा, मरीच्यादिपितामहः ।
वेदकर्ता यज्ञकर्ता, सर्वकर्ताऽमितात्मकः ॥ 34॥

अनेकसृष्टिकर्ता च, दशधासृष्टिकारकः ।
यज्ञाङ्गो यज्ञवाराहो, भूधरो भूमिपालकः ॥ 35॥

सेतुर्विधरणो जैत्रो, हिरण्याक्षान्तकः(स्) सुरः ।
दितिकश्यपकामैक- हेतुसृष्टिप्रवर्तकः ॥ 36॥

देवाभयप्रदाता च, वैकुण्ठाधिपतिर्महान् ।
सर्वगर्वप्रहारी च, सनकाद्यखिलार्थदः ॥ 37॥

सर्वाश्वासनकर्ता च, भक्ततुल्याहवप्रदः ।
काललक्षणहेतुश्च, सर्वार्थज्ञापकः(फ्) परः ।।38।।

भक्तोन्नतिकरः(स्) सर्व- प्रकारसुखदायकः ।
नानायुद्धप्रहरणो, ब्रह्माशापविमोचकः ।।39।।

पुष्टिसर्गप्रणेता च, गुणसृष्टिप्रवर्तकः ।
कर्दमेष्टप्रदाता च, देवहूत्यखिलार्थदः ।।40।।

शुक्लनारायणः(स्) सत्यः(ख्), कालधर्मप्रवर्तकः ।
ज्ञानावतारः(श्) शान्तात्मा, कपिलः(ख्) कालनाशकः ।।41।।

त्रिगुणाधिपतिः(स्) साङ्ख्य- शास्त्रकर्ता विशारदः ।
सर्गदूषणहारी च, पुष्टिमोक्षप्रवर्तकः ।।42।।

लौकिकानन्ददाता च, ब्रह्मानन्दप्रवर्तकः ।
भक्तिसिद्धान्तवक्ता च, सगुणज्ञानदीपकः ।।43।।

आत्मप्रदः(फ्) पूर्णकामो, योगात्मा योगभावितः ।
जीवन्मुक्तिप्रदः(श्) श्रीमान्- श्रद्धाभक्तिप्रवर्तकः ।।44।।

कालसामर्थ्यदाता च, कालदोषनिवारकः ।

गर्भोत्तमज्ञानदाता, कर्ममार्गनियामकः ।।45।।

सर्वमार्गनिराकर्ता, भक्तिमार्गैकपोषकः ।

सिद्धिहेतुः(स्) सर्वहेतु(स्) , सर्वाश्चर्यैककारणम् ।।46।।

चेतनाचेतनपतिः(स्), समुद्रपरिपूजितः ।

सांख्याचार्यस्तुतः(स्) सिद्ध- पूजितः(स्) सर्वपूजितः ।।47।।

## चतुर्थस्कन्धीयनामानि

### विसर्गलीला

विसर्गकर्ता सर्वेशः(ख्), कोटिसूर्यसमप्रभः ।

अनन्तगुणगम्भीरो महापुरुषपूजितः ।।48।।

अनन्तसुखदाता च, ब्रह्मकोटिप्रजापतिः ।

सुधाकोटिस्वास्थ्यहेतुः(ख्), कामधुक्कोटिकामदः ।।49।।

समुद्रकोटिगम्भीरस्- तीर्थकोटिसमाह्वयः ।

सुमेरुकोटिनिष्कम्पः(ख्) कोटिब्रह्माण्डविग्रहः ।।50।।

कोट्यश्वमेधपापघ्नो, वायुकोटिमहाबलः ।

कोटीन्दुजगदानन्दी, शिवकोटिप्रसादकृत् ।।51।।

सर्वसद्गुणमाहात्म्यः(स्), सर्वसद्गुणभाजनम् ।

मन्वादिप्रेरको धर्मो, यज्ञनारायणः(फ्) परः ।।52।।

आकूतिसूनुर्देवेन्द्रो, रुचिजन्माभयप्रदः ।

दक्षिणापतिरोजस्वी, क्रियाशक्तिः(फ्) परायणः ।।53।।

दत्तात्रेयो योगपति- योगमार्गप्रवर्तकः ।
अनसूयागर्भरत्न- मृषिवंशविवर्धनः ।।54।।

गुणत्रयविभागज्ञश्- चतुर्वर्गविशारदः ।
नारायणो धर्मसूनुर्- मूर्तिपुण्ययशस्करः ।।55।।

सहस्रकवचच्छेदी , तपः(स्)सारो नरप्रियः ।
विश्वानन्दप्रदः(ख्) कर्म- साक्षी भारतपूजितः ।।56।।

अनन्ताद्भुतमाहात्म्यो, बदरीस्थानभूषणम् ।
जितकामो जितक्रोधो, जितसङ्गो जितेन्द्रियः ।।57।।

उर्वशीप्रभवः(स्) स्वर्ग- सुखदायी स्थितिप्रदः ।
अमानी मानदो गोप्ता, भगवच्छास्त्रबोधकः ।।58।।

ब्रह्मादिवन्द्यो हंसश्रीर्- मायावैभवकारणम् ।
विविधानन्तसर्गात्मा, विश्वपूरणतत्परः ॥ 59॥

यज्ञजीवनहेतुश्च, यज्ञस्वामीष्टबोधकः ।
नानासिद्धान्तगम्यश्च, सप्ततन्तुश्च षड्गुणः ॥ 60॥

प्रतिसर्गजगत्कर्ता, नानालीलाविशारदः ।
ध्रुवप्रियो ध्रुवस्वामी, चिन्तिताधिकदायकः ॥ 61॥

दुर्लभानन्तफलदो, दयानिधिरमित्रहा ।
अङ्गस्वामी कृपासारो, वैन्यो भूमिनियामकः ॥ 62॥

भूमिदोग्धा प्रजाप्राण- पालनैकपरायणः ।
यशोदाता ज्ञानदाता, सर्वधर्मप्रदर्शकः ॥ 63॥

पुरञ्जनो जगन्मित्रं(वँ), विसर्गान्तप्रदर्शकः ।
प्रचेतसां पतिश्चित्र- भक्तिहेतुर्जनार्दनः ॥ 64॥

## पंचमस्कंधीयनामानि

### (स्थानलीला)

स्मृतिहेतुब्रह्मभाव- सायुज्यादिप्रदः(श्) शुभः ।
विजयी स्थितिलीलाब्धि- रच्युतो विजयप्रदः ॥ 65॥

स्वसामर्थ्यप्रदो भक्त- कीर्तिहेतुरधोक्षजः ।
प्रियव्रतप्रियस्वामी, स्वेच्छावादविशारदः ॥ 66॥

सङ्ग्यगम्यः(स्) स्वप्रकाशः(स्), सर्वसङ्गविवर्जितः ।
इच्छायां(ञ्) च समर्यादस्- त्यागमात्रोपलम्भनः ॥ 67॥

अचिन्त्यकार्यकर्ता च, तर्कागोचरकार्यकृत् ।
शृङ्गाररसमर्यादा, आग्नीध्ररसभाजनम् ॥ 68॥

नाभीष्टपूरकः(ख्) कर्म- मर्यादादर्शनोत्सुकः ।
सर्वरूपोऽद्भुततमो, मर्यादापुरुषोत्तमः ॥ 69॥

सर्वरूपेषु सत्यात्मा, कालसाक्षी शशिप्रभः ।
मेरुदेवीव्रतफल- मृषभो भगलक्षणः ॥ 70॥

जगत्सन्तर्पको मेघ- रूपी देवेन्द्रदर्पहा ।
जयन्तीपतिरत्यन्त- प्रमाणाशेषलौकिकः ॥ 71॥

शतधान्यस्तभूतात्मा, शतानन्दो गुणप्रसूः ।
वैष्णवोत्पादनपरः(स्), सर्वधर्मोपदेशकः ॥ 72॥

परहंसक्रियागोप्ता, योगचर्याप्रदर्शकः ।
चतुर्थाश्रमनिर्णेता, सदानन्दशरीरवान् ॥ 73॥

प्रदर्शितान्यधर्मश्च, भरतस्वाम्यपारकृत् ।
यथावत्कर्मकर्ता च, सङ्गानिष्टप्रदर्शकः ॥ 74॥

आवश्यकपुनर्जन्म- कर्ममार्गप्रदर्शकः ।
यज्ञरूपमृगः(श्) शान्तः(स्), सहिष्णुः(स्) सत्पराक्रमः ॥ 75॥

रहूगणगतिज्ञश्च, रहूगणविमोचकः ।
भवाटवीतत्त्ववक्ता, बहिर्मुखहिते रतः ॥ 76॥

गयस्वामी स्थानवंश- कर्ता स्थानविभेदकृत् ।
पुरुषावयवो भूमि- विशेषविनिरूपकः ॥ 77॥

जम्बूद्वीपपतिर्मेरु- नाभिपद्मरुहाश्रयः ।
नानाविभूतिलीलाढ्यो, गङ्गोत्पत्तिनिदानकृत् ॥ 78॥

गङ्गामाहात्म्यहेतुश्च, गङ्गारूपोऽतिगूढकृत् ।
वैकुण्ठदेहहेत्वम्बु- जन्मकृत् सर्वपावनः ॥ 79॥

शिवस्वामी शिवोपास्यो, गूढः(स्) सङ्कर्षणात्मकः ।
स्थानरक्षार्थमत्स्यादि- रूपः(स्) सर्वैकपूजितः ॥ 80॥

उपास्यनानारूपात्मा, ज्योतीरूपो गतिप्रदः ।
सूर्यनारायणो वेद- कान्तिरुज्ज्वलवेषधृक् ॥ 81॥

हंसोऽन्तरिक्षगमनः(स्), सर्वप्रसवकारणम् ।
आनन्दकर्ता वसुदो, बुधो वाक्पतिरुज्ज्वलः ॥ 82॥

कालात्मा कालकालश्च,  कालच्छेदकृदुत्तमः ।
शिशुमारः(स्) सर्वमूर्ति- राधिदैविकरूपधृक् ॥ 83॥

अनन्तसुखभोगाढ्यो, विवरैश्वर्यभाजनम् ।
सङ्कर्षणो दैत्यपतिः(स्), सर्वाधारो बृहद्वपुः ॥ 84॥

अनन्तनरकच्छेदी, स्मृतिमात्रार्तिनाशनः ।
सर्वानुग्रहकर्ता च, मर्यादाभिन्नशास्त्रकृत् ॥ 85॥

## षष्ठस्कंधीयनामानि

### (पोषण-पुष्टि-लीला)

कालान्तकभयच्छेदी, नामसामर्थ्यरूपधृक् ।
उद्धारानर्हगोप्त्रात्मा, नामादिप्रेरकोत्तमः ॥ 86॥

अजामिलमहादुष्ट- मोचकोऽघविमोचकः ।
धर्मवक्ताऽक्लिष्टवक्ता, विष्णुधर्मस्वरूपधृक् ॥ 87॥

सन्मार्गप्रेरको धर्ता, त्यागहेतुरधोक्षजः ।
वैकुण्ठपुरनेता च, दाससं(वँ) वृद्धिकारकः ॥ 88॥

दक्षप्रसादकृद्धम्स- गुह्यस्तुतिविभावनः ।
स्वाभिप्रायप्रवक्ता च, मुक्तजीवप्रसूतिकृत् ॥ 89॥

नारदप्रेरणात्मा च, हर्यश्वब्रह्मभावनः ।
शबलाश्वहितो गूढ- वाक्यार्थज्ञापनक्षमः ॥ 90॥

गूढार्थज्ञापनः(स्) सर्व- मोक्षानन्दप्रतिष्ठितः ।
पुष्टिप्ररोहहेतुश्च, दासैकज्ञातहृद्गतः ॥ 91॥

शान्तिकर्ता सुहितकृत्- स्त्रीप्रसूः(स्) सर्वकामधुक् ।
पुष्टिवम्शप्रणेता च, विश्वरूपेष्टदेवता ॥ 92 ॥

कवचात्मा पालनात्मा, वर्मोपचितिकारणम् ।
विश्वरूपशिरश्छेदी, त्वाष्ट्रयज्ञविनाशकः ॥ 93 ॥

वृत्रस्वामी वृत्रगम्यो, वृत्रव्रतपरायणः ।
वृत्रकीर्तिर्वृत्रमोक्षो, मघवत्प्राणरक्षकः ॥ 94 ॥

अश्वमेधहविर्भोक्ता, देवेन्द्रामीवनाशकः ।
संसारमोचकश्चित्र- केतुबोधनतत्परः ॥ 95 ॥

मन्त्रसिद्धिः(स्) सिद्धिहेतुः(स्), सुसिद्धिफलदायकः ।
महादेवतिरस्कर्ता , भक्तपूर्वार्थनाशकः ॥ 96 ॥

देवब्राह्मणविद्वेष- वैमुख्यज्ञापकः(श्) शिवः ।
आदित्यो दैत्यराजश्च, महत्पतिरचिन्त्यकृत् ॥ 97 ॥

## सप्तमस्कंधीय नामानि

### (ऊतिलीला)

मरुतां(म्) भेदकस्त्राता, व्रतात्मा पुम्प्रसूतिकृत् ।
कर्मात्मा वासनात्मा च, ऊतिलीलापरायणः ॥ 98 ॥

समदैत्यसुरः(स्) स्वात्मा, वैषम्यज्ञानसंश्रयः ।
देहाद्युपाधिरहितः(स्), सर्वज्ञः(स्) सर्वहेतुविद् ॥ 99 ॥

ब्रह्मवाक्स्थापनपरः(स्), स्वजन्मावधिकार्यकृत् ।
सदसद्वासनाहेतुस्- त्रिसत्यो भक्तमोचकः ॥ 100 ॥

हिरण्यकशिपुद्वेषी, प्रविष्टात्माऽतिभीषणः ।
शान्तिज्ञानादिहेतुश्च, प्रह्लादोत्पत्तिकारणम् ॥ 101 ॥

दैत्यसिद्धान्तसद्वक्ता, तपः(स्)सार उदारधीः ।
दैत्यहेतुप्रकटनो, भक्तिचिह्नप्रकाशकः ॥ 102 ॥

सद्द्वेषहेतुः(स्) सद्द्वेष- वासनात्मा निरन्तरः ।
नैष्ठुर्यसीमा प्रह्लाद- वत्सलः(स्) सङ्गदोषहा ॥ 103 ॥

महानुभावः(स्) साकारः(स्), सर्वाकारः(फ्) प्रमाणभूः ।
स्तम्भप्रसूतिर्नृहरिर्- नृसिंहो भीमविक्रमः ॥ 104 ॥

विकटास्यो ललज्जिह्वो, नखशस्त्रो जवोत्कटः ।
हिरण्यकशिपुच्छेदी, क्रूरदैत्यविनाशकः ॥ 105 ॥

सिं(म्)हासनस्थः(ख्) क्रोधात्मा, लक्ष्मीभयविवर्धनः ।
ब्रह्माद्यत्यन्तभयभू- रपूर्वाचिन्त्यरूपधृक् ॥ 106 ॥

भक्तैकशान्तहृदयो, भक्तस्तुत्यः(स्) स्तुतिप्रियः ।
भक्ताङ्गलेहनोद्धूत- क्रोधपुङ्जः(फ्) प्रशान्तधीः ॥ 107 ॥

स्मृतिमात्रभयत्राता, ब्रह्मबुद्धिप्रदायकः ।
गोरूपधार्यमृतपाः(श्), शिवकीर्तिविवर्धनः ॥ 108 ॥

धर्मात्मा सर्वकर्मात्मा, विशेषात्माऽऽश्रयप्रभुः ।
सं(म्)सारमग्नस्वोद्धर्ता, सन्मार्गाखिलतत्त्ववाक् ॥ 109 ॥

## अष्टमस्कन्धीय नामानि

### मन्वन्तरलीला

आचारात्मा सदाचारो, मन्वन्तरविभावनः ।

स्मृत्याऽशेषाशुभहरो, गजेन्द्रस्मृतिकारणम् ॥ 110॥

जातिस्मरणहेत्वैक- पूजाभक्तिस्वरूपदः ।
यज्ञो भयान्मनुत्राता, विभुर्ब्रह्मव्रताश्रयः ॥ 111॥

सत्यसेनो दुष्टघाती, हरिर्गजविमोचकः ।
वैकुण्ठो लोककर्ता च, अजितोऽमृतकारणम् ॥ 112॥

उरुक्रमो भूमिहर्ता, सार्वभौमो बलिप्रियः ।
विभुः(स्) सर्वहितैकात्मा, विष्वक्सेनः(श्) शिवप्रियः ॥ 113॥

धर्मसेतुर्लोकधृतिः(स्), सुधर्मान्तरपालकः ।
उपहर्ता योगपतिर्- बृहद्भानुः(ख्) क्रियापतिः ॥ 114॥

चतुर्दशप्रमाणात्मा, धर्मो मन्वादिबोधकः ।
लक्ष्मीभोगैकनिलयो, देवमन्त्रप्रदायकः ॥ 115॥

दैत्यव्यामोहकः(स्) साक्षाद् - गरुडस्कन्धसं(म्)श्रयः ।
लीलामन्दरधारी च, दैत्यवासुकिपूजितः ॥ 116॥

समुद्रोन्मथनायत्तोऽ- विघ्नकर्ता स्ववाक्यकृत् ।
आदिकूर्मः(फ्) पवित्रात्मा, मन्दराघर्षणोत्सुकः ॥ 117॥

श्वासैजदब्धिवार्वीचिः(ख्), कल्पान्तावधिकार्यकृत् ।
चतुर्दशमहारत्नो, लक्ष्मीसौभाग्यवर्धनः ॥ 118॥

धन्वन्तरिः(स्) सुधाहस्तो, यज्ञभोक्ताऽऽर्तिनाशनः ।
आयुर्वेदप्रणेता च, देवदैत्याखिलार्चितः ॥ 119॥

बुद्धिव्यामोहको देव- कार्यसाधनतत्परः ।
स्त्रीरूपो मायया वक्ता, दैत्यान्तः(ख्)करणप्रियः ॥ 120॥

पायितामृतदेवां(म्)शो, युद्धहेतुस्मृतिप्रदः ।
सुमालिमालिवधकृन्- माल्यवत्प्राणहारकः ॥ 121॥

कालनेमिशिरश्छेदी, दैत्ययज्ञविनाशकः ।
इन्द्रसामर्थ्यदाता च, दैत्यशेषस्थितिप्रियः ॥ 122॥

शिवव्यामोहको मायी, भृगुमन्त्रस्वशक्तिदः ।
बलिजीवनकर्ता च, स्वर्गहेतुर्व्रतार्चितः ॥ 123॥

अदित्यानन्दकर्ता च, कश्यपादितिसम्भवः ।
उपेन्द्र इन्द्रावरजो, वामनब्रह्मरूपधृक् ॥ 124॥

ब्रह्मादिसेवितवपुर्- यज्ञपावनतत्परः ।
याञ्चोपदेशकर्ता च, ज्ञापिताशेषसं(म्)स्थितिः ॥ 125॥

सत्यार्थप्रेरकः(स्) सर्व - हर्ता गर्वविनाशकः ।
त्रिविक्रमस्त्रिलोकात्मा, विश्वमूर्तिः(फ्) पृथुश्रवाः ॥ 126॥

पाशबद्धबलिः(स्) सर्व- दैत्यपक्षोपमर्दकः ।
सुतलस्थापितबलिः(स्), स्वर्गाधिकसुखप्रदः ॥ 127॥

कर्मसम्पूर्तिकर्ता च, स्वर्गसं(म्)स्थापितामरः ।
ज्ञातत्रिविधधर्मात्मा, महामीनोऽब्धिसं(म्)श्रयः ॥ 128॥

सत्यव्रतप्रियो गोप्ता, मत्स्यमूर्तिधृतश्रुतिः ।
शृङ्गबद्धधृतक्षोणिः(स्), सर्वार्थज्ञापको गुरुः ॥ 129॥

# नवमस्कन्धी यनामानि

## ईशानुकथालीला

ईशसेवकलीलात्मा, सूर्यवं(म्)शप्रवर्तकः ।
सोमवं(म्)शोद्भवकरो, मनुपुत्रगतिप्रदः ॥ 130॥

अम्बरीषप्रियः(स्) साधुर्- दुर्वासागर्वनाशकः ।
ब्रह्मशापोपसं(म्)हर्ता, भक्तकीर्तिविवर्धनः ॥ 131॥

इक्ष्वाकुवं(म्)शजनकः(स्), सगराद्यखिलार्थदः ।
भगीरथमहायत्नो, गङ्गाधौताङ्घ्रिपङ्कजः ॥ 132॥

ब्रह्मस्वामी शिवस्वामी, सगरात्मजमुक्तिदः ।
खट्वाङ्गमोक्षहेतुश्च, रघुवं(म्)शविवर्धनः ॥ 133॥

रघुनाथो रामचन्द्रो, रामभद्रो रघुप्रियः ।
अनन्तकीर्तिः(फ्) पुण्यात्मा, पुण्यश्लोकैकभास्करः ॥ 134॥

कोशलेन्द्रः(फ्) प्रमाणात्मा, सेव्यो दशरथात्मजः ।
लक्ष्मणो भरतश्चैव, शत्रुघ्नो व्यूहविग्रहः ॥ 135॥

विश्वामित्रप्रियो दान्तस्- ताडकावधमोक्षदः ।
वायव्यास्त्राब्धिनिक्षिप्त- मारीचश्च सुबाहुहा ॥ 136॥

वृषध्वजधनुर्भङ्ग- प्राप्तसीतामहोत्सवः ।
सीतापतिर्भृगुपतिर्- गर्वपर्वतनाशकः ॥ 137॥

अयोध्यास्थमहाभोग- युक्तलक्ष्मीविनोदवान् ।
कैकेयीवाक्यकर्ता च, पितृवाक्परिपालकः ॥ 138॥

वैराग्यबोधकोऽनन्य - सात्त्विकस्थानबोधकः ।
अहल्यादुःखहारी च,  गुहस्वामी सलक्ष्मणः ॥ 139॥

चित्रकूटप्रियस्थानो, दण्डकारण्यपावनः ।
शरभङ्गसुतीक्ष्णादि- पूजितोऽगस्त्यभाग्यभूः ॥ 140॥

ऋषिसम्प्रार्थितकृतिर्- विराधवधपण्डितः ।
छिन्नशूर्पणखानासः(ख्), खरदूषणघातकः ॥ 141॥

एकबाणहतानेक- सहस्रबलराक्षसः ।
मारीचघाती नियत- सीतासम्बन्धशोभितः ॥ 142॥

सीतावियोगव्यग्रश्च, जटायुर्वधमोक्षदः ।
शबरीपूजितो भक्त- हनुमत्प्रमुखावृतः ॥ 143॥

दुन्दुभ्यस्थिप्रहरणः(स्), सप्ततालविभेदनः ।
सुग्रीवराज्यदो वालि- घाती सागरशोषणः ॥ 144॥

सेतुबन्धनकर्ता च, विभीषणहितप्रदः ।
रावणादिशिरश्छेदी, राक्षसाघौघनाशकः ॥ 145॥

सीताऽभयप्रदाता च, पुष्पकागमनोत्सुकः ।
अयोध्यापतिरत्यन्त- सर्वलोकसुखप्रदः ॥ 146॥

मथुरापुरनिर्माता, सुकृतज्ञस्वरूपदः ।
जनकज्ञानगम्यश्च, ऐलान्तप्रकटश्रुतिः ॥ 147॥

हैहयान्तकरो रामो, दुष्टक्षत्रविनाशकः ।
सोमवं(म्)शहितैकात्मा, यदुवं(म्)शविवर्धनः ॥ 148॥

# दशमस्कंधीय- पूर्वार्धनामानि

## निरोधलीला

परब्रह्मावतरणः(ख्), केशवः(ख्) क्लेशनाशनः ।
भूमिभारावतरणो, भक्तार्थाखिलमानसः ॥ 149॥

सर्वभक्तनिरोधात्मा, लीलानन्तनिरोधकृत् ।
भूमिष्ठपरमानन्दो, देवकीशुद्धिकारणम् ॥ 150॥

वसुदेवज्ञाननिष्ठ- समजीवनिवारकः ।
सर्ववैराग्यकरण - स्वलीलाधारसाधकः ॥ 151॥

मायाज्ञापनकर्ता च, शेषसम्भारसम्भृतिः ।
भक्तक्लेशपरिज्ञाता, तन्निवारणतत्परः ॥ 152॥

आविष्टवसुदेवां(म्)शो, देवकीगर्भभूषणम् ।
पूर्णतेजोमयः(फ्) पूर्णः(ख्), कं(म्)साधृष्यप्रतापवान् ॥ 153॥

विवेकज्ञानदाता च, ब्रह्माद्यखिलसं(म्)स्तुतः ।
सत्यो जगत्कल्पतरुर्- नानारूपविमोहनः ॥ 154॥

भक्तिमार्गप्रतिष्ठाता, विद्वन्मोहप्रवर्तकः ।
मूलकालगुणद्रष्टा, नयनानन्दभाजनम् ॥ 155॥

वसुदेवसुखाब्धिश्च, देवकीनयनामृतम् ।
पितृमातृस्तुतः(फ्) पूर्व- सर्ववृत्तान्तबोधकः ॥ 156॥

गोकुलागतिलीलाप्त- वसुदेवकरस्थितिः ।
सर्वेशत्वप्रकटनो, मायाव्यत्ययकारकः ॥ 157॥

ज्ञानमोहितदुष्टेशः(फ्), प्रपञ्चास्मृतिकारणम् ।
यशोदानन्दनो नन्द- भाग्यभूगोकुलोत्सवः ॥ 158॥

नन्दप्रियो नन्दसूनुर्- यशोदायाः(स्) स्तनन्धयः ।
पूतनासुपयः(फ्) पाता, मुग्धभावातिसुन्दरः ॥ 159॥

सुन्दरीहृदयानन्दो, गोपीमन्त्राभिमन्त्रितः ।
गोपालाश्चर्यरसकृत्, शकटासुरखण्डनः ॥ 160॥

नन्दव्रजजनानन्दी, नन्दभाग्यमहोदयः ।
तृणावर्तवधोत्साहो, यशोदाज्ञानविग्रहः ॥ 161॥

बलभद्रप्रियः(ख्) कृष्णः(स्), सङ्कर्षणसहायवान् ।
रामानुजो वासुदेवो, गोष्ठाङ्गणगतिप्रियः ॥ 162॥

किङ्किणीरवभावज्ञो, वत्सपुच्छावलम्बनः ।
नवनीतप्रियो गोपी- मोहसं(म्)सारनाशकः ॥ 163॥

गोपबालकभावज्ञश्- चौर्यविद्याविशारदः ।
मृत्स्नाभक्षणलीलास्य- माहात्म्यज्ञानदायकः ॥ 164॥

धराद्रोणप्रीतिकर्ता, दधिभाण्डविभेदनः ।
दामोदरो भक्तवश्यो, यमलार्जुनभञ्जनः ॥ 165॥

बृहद्वनमहाश्चर्यो, वृन्दावनगतिप्रियः ।
वत्सघाती बालकेलिर्- बकासुरनिषूदनः ॥ 166॥

अरण्यभोक्ताऽप्यथवा, बाललीलापरायणः ।
प्रोत्साहजनकश्चैव- मघासुरनिषूदनः ॥ 167॥

व्यालमोक्षप्रदः(फ्) पुष्टो, ब्रह्ममोहप्रवर्धनः ।
अनन्तमूर्तिः(स्) सर्वात्मा, जङ्गमस्थावराकृतिः ॥ 168॥

ब्रह्ममोहनकर्ता च, स्तुत्य आत्मा सदाप्रियः ।
पौगण्डलीलाभिरतिर्- गोचारणपरायणः ॥ 169॥

वृन्दावनलतागुल्म- वृक्षरूपनिरूपकः ।
नादब्रह्मप्रकटनो, वयः(फ्)प्रतिकृतिस्वनः ॥ 170॥

बर्हिनृत्यानुकरणो, गोपालानुकृतिस्वनः ।
सदाचारप्रतिष्ठाता, बलश्रमनिराकृतिः ॥ 171॥

तरुमूलकृताशेष- तल्पशायी सखिस्तुतः ।
गोपालसेवितपदः(श्), श्रीलालितपदाम्बुजः ॥ 172॥

गोपसम्प्रार्थितफला- दाननाशितधेनुकः ।
कालीयफणिमाणिक्य- रञ्जितश्रीपदाम्बुजः ॥ 173॥

दृष्टिसञ्जीविताशेष- गोपगोगोपिकाप्रियः ।
लीलासम्पीतदावाग्निः(फ्), प्रलम्बवधपण्डितः ॥ 174॥

दावाग्न्यावृतगोपाल- दृष्ट्याच्छादनवह्निपः ।
वर्षाशरद्विभेतिश्रीर्- गोपिकामप्रबोधकः ॥ 175॥

गोपीरत्नस्तुताशेष- वेणुवाद्यविशारदः ।
कात्यायनीव्रतव्याज- सर्वभावाश्रिताङ्गनः ॥ 176॥

सत्सङ्गतिस्तुतिव्याजस्- तुतवृन्दावनाङ्घ्रिपः ।
गोपक्षुच्छान्तिसं(वँ)व्याज- विप्रभार्याप्रसादकृत् ॥ 177॥

हेतुप्राप्तेन्द्रयागस्व- कार्यगोसवबोधकः ।
शैलरूपकृताशेष- रसभोगसुखावहः ॥ 178॥

लीलागोवर्धनोद्धार- पालितस्वव्रजप्रियः ।
गोपस्वच्छन्दलीलार्थ- गर्गवाक्यार्थबोधकः ॥ 179॥

इन्द्रधेनुस्तुतिप्राप्त- गोविन्देन्द्राभिधानवान् ।
व्रतादिधर्मसं(म्)सक्त - नन्दक्लेशविनाशकः ॥ 180॥

नन्दादिगोपमात्रेष्ट- वैकुण्ठगतिदायकः ।
वेणुवादस्मरक्षोभ- मत्तगोपीविमुक्तिदः ॥ 181॥

सर्वभावप्राप्तगोपी- सुखसं(वँ)वर्धनक्षमः ।
गोपीगर्वप्रणाशार्थ- तिरोधानसुखप्रदः ॥ 182॥

कृष्णभावव्याप्तविश्व- गोपीभावितवेशधृक् ।
राधाविशेषसम्भोग- प्राप्तदोषनिवारकः ॥ 183॥

परमप्रीतिसङ्गीत- सर्वाद्भुतमहागुणः ।
मानापनोदनाक्रन्द- गोपीदृष्टिमहोत्सवः ॥ 184॥

गोपिकाव्याप्तसर्वाङ्गः(स्), स्त्रीसम्भाषाविशारदः ।
रासोत्सवमहासौख्य- गोपीसम्भोगसागरः ॥ 185॥

जलस्थलरतिव्याप्त- गोपीदृष्ट्याभिपूजितः ।
शास्त्रानपेक्षकामैक- मुक्तिद्वारविवर्धनः ॥ 186॥

सुदर्शनमहासर्प - ग्रस्तनन्दविमोचकः ।
गीतमोहितगोपीधृक्- शङ्खचूडविनाशकः ॥ 187॥

गुणसङ्गीतसन्तुष्टिर्- गोपीसं(म्)सारविस्मृतिः ।
अरिष्टमथनो दैत्य- बुद्धिव्यामोहकारकः ॥ 188॥

केशिघाती नारदेष्टो, व्योमासुरविनाशकः ।
अक्रूरभक्तिसं(म्)राद्ध- पादरेणुमहानिधिः ॥ 189॥

रथावरोहशुद्धात्मा, गोपिमानसहारकः ।
ह्रदसन्दर्शिताशेष- वैकुण्ठाक्रूरसं(म्)स्तुतः ॥ 190॥

मथुरागमनोत्साहो, मथुराभाग्यभाजनम् ।
मथुरानगरीशोभा- दर्शनोत्सुकमानसः ॥ 191॥

दुष्टरञ्जकघाती च, वायकार्चितविग्रहः ।
वस्त्रमालासुशोभाङ्गः(ख्), कुब्जालेपनभूषितः ॥ 192॥

कुब्जासुरूपकर्ता च, कुब्जारतिवरप्रदः ।
प्रसादरूपसन्तुष्टो- हरकोदण्डखण्डनः ॥ 193॥

शकलाहतकं(म्)साप्त- धनूरक्षकसैनिकः ।
जाग्रत्स्वप्नभयव्याप्त- मृत्युलक्षणबोधकः ॥ 194॥

मथुरामल्ल ओजस्वी, मल्लयुद्धविशारदः ।
सद्यः(ख्) कुवलयापीड- घाती चाणूरमर्दनः ॥ 195॥

लीलाहतमहामल्लः(श्), शलतोशलघातकः ।
कं(म्)सान्तको जितामित्रो, वसुदेवविमोचकः ॥ 196॥

ज्ञाततत्त्वपितृज्ञान- मोहनामृतवाङ्मयः ।
उग्रसेनप्रतिष्ठाता, यादवाधिविनाशकः ॥ 197॥

नन्दादिसान्त्वनकरो, ब्रह्मचर्यव्रते स्थितः ।
गुरुशुश्रूषणपरो, विद्यापारमितेश्वरः ॥ 198॥

सान्दीपनिमृतापत्य- दाता कालान्तकादिजित् ।
गोकुलाश्वासनपरो, यशोदानन्दपोषकः ॥ 199॥

गोपिकाविरहव्याज- मनोगतिरतिप्रदः ।
समोद्धवभ्रमरवाक्, गोपिकामोहनाशकः ॥ 200॥

कुब्जारतिप्रदोऽक्रूर- पवित्रीकृतभूगृहः ।
पृथादुःखप्रणेता च, पाण्डवानां(म्) सुखप्रदः ॥ 201॥

## दशमस्कन्धोत्तरार्ध- नामानि

### निरोधलीला

जरासन्धसमानीत- सैन्यघातविचारकः ।
यवनव्याप्तमथुरा- जनदत्तकुशस्थलिः ॥ 202॥

द्वारकाद्भुतनिर्माण- विस्मापितसुरासुरः ।
मनुष्यमात्रभोगार्थ- भूम्यानीतेन्द्रवैभवः ॥ 203॥

यवनव्याप्तमथुरा- निर्गमानन्दविग्रहः ।
मुचुकुन्दमहाबोध- यवनप्राणदर्पहा ॥ 204॥

मुचुकुन्दस्तुताशेष- गुणकर्ममहोदयः ।
फलप्रदानसन्तुष्टिर्- जन्मान्तरितमोक्षदः ॥ 205॥

शिवब्राह्मणवाक्याप्त- जयभीतिविभावनः ।
प्रवर्षणप्रार्थिताग्नि- दानपुण्यमहोत्सवः ॥ 206॥

रुक्मिणीरमणः(ख्) काम- पिता प्रद्युम्नभावनः ।
स्यमन्तकमणिव्याज- प्राप्तजाम्बवतीपतिः ॥ 207॥

सत्यभामाप्राणपतिः(ख्), कालिन्दीरतिवर्धनः ।
मित्रविन्दापतिः(स्) सत्या- पतिर्वृषनिषूदनः ॥ 208॥

भद्रावाञ्छितभर्ता च, लक्ष्मणावरणक्षमः ।
इन्द्रादिप्रार्थितवध- नरकासुरसूदनः ॥ 209॥

मुरारिः(फ्) पीठहन्ता च, ताम्रादिप्राणहारकः ।
षोडशस्त्रीसहस्रेशश्- छत्रकुण्डलदानकृत् ॥ 210॥

पारिजातापहरणो, देवेन्द्रमदनाशकः ।
रुक्मिणीसमसर्वस्त्री- साध्यभोगरतिप्रदः ॥ 211॥

रुक्मिणीपरिहासोक्ति- वाक्तिरोधानकारकः ।
पुत्रपौत्रमहाभाग्य- गृहधर्मप्रवर्तकः ॥ 212॥

शम्बरान्तकसत्पुत्र- विवाहहतरुक्मिकः ।
उषापहृतपौत्रश्रीर्- बाणबाहुनिवारकः ॥ 213॥

शीतज्वरभयव्याप्त- ज्वरसं(म्)स्तुतषड्गुणः।
शङ्करप्रतियोद्धा च, द्वन्द्वयुद्धविशारदः ॥ 214॥

नृगपापप्रभेत्ता च, ब्रह्मस्वगुणदोषदृक् ।
विष्णुभक्तिविरोधैक- ब्रह्मस्वविनिवारकः ॥ 215॥

बलभद्राहितगुणो, गोकुलप्रीतिदायकः ।
गोपीस्नेहैकनिलयो, गोपीप्राणस्थितिप्रदः ॥ 216॥

वाक्यातिगामीयमुना- हलाकर्षणवैभवः ।
पौण्ड्रकत्याजितस्पर्धः(ख्), काशिराजविभेदनः ॥ 217॥

काशीनिदाहकरणः(श्), शिवभस्मप्रदायकः ।
द्विविदप्राणघाती च, कौरवाखर्वगर्वनुत् ॥ 218॥

लाङ्गलाकृष्टनगरी- सं(वँ)विग्नाखिलनागरः ।
प्रपन्नाभयदः(स्) साम्ब - प्राप्तसन्मानभाजनम् ॥ 219॥

नारदान्विष्टचरणो, भक्तिविक्षेपनाशकः ।
सदाचारैकनिलयः(स्), सुधर्माध्यासितासनः ॥ 220॥

जरासन्धावरुद्धेन, विज्ञापितनिजक्लमः ।
मन्त्र्युद्धवादिवाक्योक्त- प्रकारैकपरायणः ॥ 221॥

राजसूयादिमखकृत्- सम्प्रार्थितसहायकृत् ।
इन्द्रप्रस्थप्रयाणार्थ- महत्सम्भारसम्भृतिः ॥ 222॥

जरासन्धवधव्याज- मोचिताशेषभूमिपः ।
सन्मार्गबोधको यज्ञ- क्षितिवारणतत्परः ॥ 223॥

शिशुपालहतिव्याज- जयशापविमोचकः ।
दुर्योधनाभिमानाब्धि- शोषबाणवृकोदरः॥ 224॥

महादेववरप्राप्त- पुरशाल्वविनाशकः ।
दन्तवक्त्रवधव्याज- विजयाघौघनाशकः ॥ 225॥

विदूरथप्राणहर्ता, न्यस्तशस्त्रास्त्रविग्रहः ।
उपधर्मविलिप्ताङ्ग- सूतघाती वरप्रदः ॥ 226॥

बल्वलप्राणहरण- पालितर्षिश्रुतिक्रियः ।
सर्वतीर्थाघनाशार्थ- तीर्थयात्राविशारदः ॥ 227॥

ज्ञानक्रियाविभेदेष्ट- फलसाधनतत्परः ।
सारथ्यादिक्रियाकर्ता,भक्तवश्यत्वबोधकः ॥ 228॥

सुदामारङ्कभार्यार्थ- भूम्यानीतेन्द्रवैभवः ।
रविग्रहनिमित्ताप्त- कुरुक्षेत्रैकपावनः ॥ 229॥

नृपगोपसमस्तस्त्री- पावनार्थाखिलक्रियः ।
ऋषिमार्गप्रतिष्ठाता, वसुदेवमखप्रियः ॥ 230॥

वसुदेवज्ञानदाता, देवकीपुत्रदायकः ।
अर्जुनस्त्रीप्रदाता च, बहुलाश्वस्वरूपदः ॥ 231॥

श्रुतदेवेष्टदाता च, सर्वश्रुतिनिरूपितः ।
महादेवाद्यतिश्रेष्ठो, भक्तिलक्षणनिर्णयः ॥ 232॥

वृकग्रस्तशिवत्राता, नानावाक्यविशारदः ।
नरगर्वविनाशार्थ- हृतब्राह्मणबालकः ॥ 233॥

लोकालोकपरस्थान- स्थितबालकदायकः ।
द्वारकास्थमहाभोग- नानास्त्रीरतिवर्धनः ॥ 234॥

## एकादशस्कन्धीय नामानि

### मुक्तिलीला

मनस्तिरोधानकृत- व्यग्रस्त्रीचित्तभावितः ।
मुक्तिलीलाविहरणो, मौसलव्याजसं(म्)हृतिः ॥ 235॥

श्रीभागवतधर्मादि- बोधको भक्तिनीतिकृत् ।
उद्धवज्ञानदाता च, पञ्चविं(म्)शतिधा गुरुः ॥ 236॥

आचारमुक्तिभक्त्यादि- वक्ता शब्दोद्भवस्थितिः ।
हं(म्)सो धर्मप्रवक्ता च, सनकाद्युपदेशकृत् ॥ 237॥

भक्तिसाधनवक्ता च, योगसिद्धिप्रदायकः ।
नानाविभूतिवक्ता च, शुद्धधर्मावबोधकः ॥ 238॥

मार्गत्रयविभेदात्मा, नानाशङ्कानिवारकः ।
भिक्षुगीताप्रवक्ता च, शुद्धसाङ्ख्यप्रवर्तकः ॥ 239॥

मनोगुणविशेषात्मा, ज्ञापकोक्तपुरूरवाः ।
पूजाविधिप्रवक्ता च, सर्वसिद्धान्तबोधकः ॥ 240॥

लघुस्वमार्गवक्ता च, स्वस्थानगतिबोधकः ।
यादवाङ्गोपसं(म्)हर्ता, सर्वाश्चर्यगतिक्रियः ॥ 241॥

## द्वादशस्कन्धीय नामानि

### आश्रयलीला

कालाधर्मविभेदार्थ- वर्णनाशनतत्परः ।
बुद्धो गुप्तार्थवक्ता च, नानाशास्त्रविधायकः ॥ 242॥

नष्टधर्ममनुष्यादि- लक्षणज्ञापनोत्सुकः ।
आश्रयैकगतिज्ञाता, कल्किः(ख्) कलिमलापहः ॥ 243॥

शास्त्रवैराग्यसम्बोधो, नानाप्रलयबोधकः ।
विशेषतः(श्) शुकव्याज- परीक्षिज्ज्ञानबोधकः ॥ 244॥

शुकेष्टगतिरूपात्मा, परीक्षिद्देहमोक्षदः ।
शब्दरूपो नादरूपो, वेदरूपो विभेदनः ॥ 245॥

व्यासः(श्) शाखाप्रवक्ता च, पुराणार्थप्रवर्तकः ।
मार्कण्डेयप्रसन्नात्मा, वटपत्रपुटेशयः ॥ 246॥

मायाव्याप्तमहामोह- दुःखशान्तिप्रवर्तकः ।
महादेवस्वरूपश्च, भक्तिदाता कृपानिधिः ॥ 247॥

आदित्यान्तर्गतः(ख्) कालो , द्वादशात्मासुपूजितः ।
श्रीभागवतरूपश्च, सर्वार्थफलदायकः ॥ 248॥

इतीदं(ङ्) कीर्तनीयस्य, हरेर्नामसहस्रकम् ।
पञ्चसप्ततिविस्तीर्णं(म्), पुराणान्तरभाषितम् ॥ 249॥

य एतत्प्रातरुत्थाय, श्रद्धावान् सुसमाहितः ।
जपेदर्थाहितमतिः(स्), स गोविन्दपदं(वँ) व्रजेत्त् ॥ 250॥

सर्वधर्मविनिर्मुक्तः(स्), सर्वसाधनवर्जितः ।
एतद्धारणमात्रेण, कृष्णस्य पदवीं(वँ) व्रजेत् ॥ 251॥

हर्यावेशितचित्तेन, श्रीभागवतसागरात् ।
समुद्धुतानि नामानि, चिन्तामणिनिभानि हि ॥ 252॥

कण्ठस्थितान्यर्थदीप्त्या, बाधन्तेऽज्ञानजं(न्) तमः ।
भक्तिं(म्) श्रीकृष्णदेवस्य , साधयन्ति विनिश्चितम् ॥ 253॥

किम् बहूक्तेन भगवान्, नामभिः(स्) स्तुतषड्गुणः ।
आत्मभावं(न्) नयत्याशु, भक्तिं(ञ्) च कुरुते दृढाम् ॥ 254॥

यः(ख्) कृष्णभक्तिमिह वाञ्छति साधनौघैर्-
नामानि भासुरयशशां(म्)सि जपेत्स नित्यम् ।
तं(वँ) वै हरिः(स्) स्वपुरुषं(ङ्) कुरुतेऽतिशीघ्र-
मात्मार्पणं(म्) समधिगच्छति भावतुष्टः ॥ 255॥

श्रीकृष्ण कृष्णसख वृष्णिवृषावनिर्ध्रुग्-
राजन्यवं(म्)शदहनानपवर्गवीर्य ।
गोविन्द गोपवनिताव्रजभृत्यगीत,
तीर्थश्रवः(श्) श्रवणमङ्गल पाहि भृत्यान् ॥256॥

॥ इति श्रीभागवतसारसमुच्चये वैश्वानरोक्तं(म्)
श्रीवल्लभाचार्यविरचितं(म्) श्रीपुरुषोत्तमसहस्रनामस्तोत्रं(म्) सम्पूर्णम्॥

